

ISSN No. : 0975-8348



# संस्कृतविद्या

प्रकाशकः
संस्कृतविद्याधर्मविज्ञानसङ्कायः
काशीहिन्दूविश्वविद्यालयः, वाराणसी-२२१००५

प्रधानसम्पादकः
प्रोफेसर चन्द्रमापाण्डेयः
सङ्कायप्रमुखः

संस्कृतविद्याधर्मविज्ञानसङ्कायस्य शोध-पत्रिका

ISSN No. : 0975-8348

# संस्कृतविद्या

**संरक्षकः**

**प्रोफेसर लालजीसिंहः**

कुलपतिः

**प्रधानसम्पादकः**

**प्रो. चन्द्रमापाण्डेयः**

सङ्कायप्रमुखः

**सम्पादकौ**

**प्रो. चन्द्रमौलिद्विवेदी**

**प्रो. कौशलेन्द्रपाण्डेयः**

**पत्रिकाप्रकाशनसमितिः**

**डॉ. धनञ्जयकुमारपाण्डेयः • डॉ. रामजीवनमिश्रः**

**डॉ. रजनीशपाण्डेयः • डॉ. रमाकान्तपाण्डेयः**

**डॉ. शिवरामगंगोपाध्यायः • डॉ. शीतलाप्रसादपाण्डेयः**

**डॉ. सुनीलकात्यायनः • डॉ. शान्तिलालसाल्वी**

**डॉ. जगदीशचतुर्वेदी**

**प्रकाशकः**

**संस्कृतविद्याधर्मविज्ञानसङ्कायः**

वि.सं.- २०६९ काशीहिन्दूविश्वविद्यालयः, वाराणसी-५ ई. २०१२

| | | | |
|---|---|---|---|
| ४२. | सृष्टिरहस्यम् | शशिकान्त तिवारी | |
| ४३. | व्याकरणदर्शनाद्यभिमतं शक्तिस्वरूपम् | अम्बरीशकुमारमिश्रः | १४५ |
| ४४. | प्राकृत जैन वाङ्मय में अहिंसा की विवेचना | पंकज कुमार जैन | १४९ |
| ४५. | उपाकर्म एवं उत्सर्जन एक मीमांसा | शशिरंजन कुमार पाण्डेय | १५१ |
| ४६. | काव्यशास्त्रीय रस का दार्शनिकविमर्श | राजकुमार | १५४ |
| ४७. | वेदार्थावबोध में वेदाङ्गों का अवदान | डॉ. अर्चना पाण्डेय | १५७ |
| ४८. | वेदाङ्ग-शिक्षा का समीक्षात्मक स्वरूप | दीपक कुमार शर्मा | १६० |
| ४९. | याज्ञवल्क्य शिक्षा में त्रैस्वर्यलक्षणविमर्श | धनेश कुमार पाण्डेय | १६३ |
| ५०. | कर्तुरीप्सिततमं कर्म" इति सूत्रे तमब्ग्रहणमावश्यकम् | भूपेन्द्रकुमारओझा | १६६ |
| ५१. | पदशक्तौ नागेशः | कमलप्रसादगौतमः | १६९ |
| ५२. | पञ्चावयवेषु प्रमाणानां विनियोग प्रकारः | बी. उमामहेश्वरी | १७१ |
| ५३. | वेदस्य आन्तरिकविज्ञानोद्घाटनम् | के.वि.हनुमत्शर्मा | १७४ |
| ५४. | दायविभागे शास्त्रकाराणां मतभेदविचारः | प्रियङ्कर अग्रवालः | १७६ |
| ५५. | वेदान्ते भुवनकोषः | स्वामी ज्ञानपुरी | १७९ |
| ५६. | बौद्ध धर्म एवं सनातन (हिन्दू) धर्म की अन्योन्याश्रितता | रत्नाकर पाण्डेय | १८३ |
| ५७. | स्मार्तसंस्काराः | जी. श्रीनिवासशास्त्री | १८६ |
| ५८. | ग्रहणविमर्शः | कृष्णकुमारभार्गवः | १९१ |
| ५९. | श्रीमद्भट्टोजिदीक्षित नागेशभट्टयोः मतानुसारम् "आदिरन्त्येन सहेता" इति सूत्रस्य समीक्षणम् | आर. सुब्बलक्ष्मी | १९३ / १९६ |
| ६०. | प्राचीनार्वाचीनदृशा ज्योतिषशास्त्रीयं ग्रहविज्ञानम् | मधुसूदनमिश्रः | १९८ |
| ६१. | गङ्गा प्रासङ्गिक : आज भी, कल भी | रीतेश कुमार चतुर्वेदी | २०५ |
| ६२. | उपनिषदां वैशिष्ट्यम् | लक्ष्मीप्रसादतिवारी | २०८ |
| ६३. | जीवने ग्रहाणां प्रभावः | देवकृष्णझा | २१० |
| ६४. | पृथिव्या अक्षभ्रमणम् | मुकेश कुमार ओझा | २१३ |
| ६५. | ज्योतिषशास्त्रे कालविमर्शः | सुनील कुमार चतुर्वेदी | २१६ |
| ६६. | अभिनवकाव्यालङ्कारसूत्रे काव्यस्वरूपविवेचनम् | मनीषचन्द्रपाण्डेयः | २१९ |
| ६७. | वेदान्तपरिभाषोक्तप्रमालक्षणविचारः | तुलसीकुमारजोशी | २२२ |
| ६८. | वैदिककालीनज्योतिषम् | नर्वदेश्वरकुमारमिश्रः 'नीर' | २२५ |
| ६९. | कतिपयदार्शनिकाभिमतप्रथमाविभक्त्यर्थविमर्शः | गणेश्वरनाथ झा | २२९ |
| ७०. | ज्योतिषेऽङ्गविद्या | डॉ. सुभाषपाण्डेयः | २३३ |
| ७१. | ग्रहणकृत्यविमर्शः | सन्तोषकुमारतिवारी | २३९ |
| ७२. | आन्तरिक्षोत्पात विमर्श | कुन्जबिहारीशर्मा | २४२ |
| ७३. | बौद्ध आचार में भिक्षुणियों की स्थिति | ज्ञानदास | २४४ |
| ७४. | बारह भावनायें | सुश्री अनामिका जैन | २४७ |
| ७५. | आम्नाय परिपथानुगामिनी – 'नारी' | श्रीमती निधि गोस्वामी | २५० |
| ७६. | न्यायदृष्ट्याऽनुमानप्रमाणमीमांसा | डॉ. महेशझा | २५२ |
| ७७. | भौतिकवादी जीवन शैली में षट्कर्मो की उपादेयता | याज्ञवल्क्य | २५७ |
| ७८. | परम धर्म अहिंसा | ममता सिंह | २५९ |
| ७९. | राजयोगविमर्शः | गणेशत्रिपाठी | २६२ |
| ८०. | न्यायव्याकरणाभिमताकांक्षास्वरूपविमर्श | राजीवलोचन शर्मा | २६७ |
| ८१. | संविन्महेश्वरो भाति विमर्शात्मा प्रकाशभूः | सिद्धिदात्री भारद्वाज | २७० |
| ८२. | सच्चिदानन्द गुरु थे- भगवान राम | सुभद्रा कुमारी | २७३ |
| ८३. | पुराणस्थकारकेषु कर्तृकर्मकारकपर्यालोचनम् | आत्मानन्द सरस्वती | २७७ |
| ८४. | काशी हिन्दू विश्वविद्यालय का संस्कृतविद्याधर्मविज्ञानसंकाय | डॉ. शिवदत्तशर्मा चतुर्वेदी | २७९ |
| ८५. | पण्डित भालचन्द्र पाण्डेय जी की जीवनवृत्त | संजय त्रिपाठी | २८७ |
| ८६. | Ontology and Epistemology of Nyaya and Avayava | G. Jayamanikya Shastri | २९१ |

# पञ्चावयवेषु प्रमाणानां विनियोग प्रकारः

बी. उमामहेश्वरी*

इह खलु प्रत्यतो दृश्यमाने मिथ्याज्ञानप्रकटितविविधवैचित्र्ये आपाततः अतिरमणीयेऽस्मिन् प्रपञ्चे प्रत्यक्षोपजीवकं किमिति प्रत्यक्षोपजीवकत्वप्रकारिकायां जिज्ञासायां शिष्यद्वारा प्रकटीकृतायाम् अनुमानं निरूपयन्ति आचार्यचरणाः- "तच्चानुमानं स्वार्थ-परार्थभेदेन द्विविधम्"। तत्र "परार्थानुमानं न्यायसाध्यमिति न्यायः तदवयवाश्च निरूप्यन्ते" इति। इदानीम् ऐतिहासिकदृष्ट्या विचार्यमाणे परार्थानुमानार्थं प्रयुज्यमाना अवयवाः कति सन्तिः? के च ते इति जिज्ञासा सर्वेषां दार्शनिकानां बुद्धिस्थितो जागरूको भवति। एतस्य प्रश्नस्य समाधानं तत्तच्छास्त्रकारैः स्वस्वप्रयोगपद्धतेरनुसारम् एवं प्रदत्तवन्तः। अत्र केचन पञ्चावयवान्, केचन दशावयवान्, अपरे चतुरोऽवयवान्, अन्ये विद्वांसस्त्र्यवयवान्, केचन द्वावेवावयवौ, एकञ्चावयवमित्येके स्वीकुर्वन्ति। एवं क्रमेण एतेषामवयवानां परम्परा षट्श्रेणीषु विभज्यमाना दृश्यते। इदानीमेतान् सर्वानपि प्रत्येकं पश्यामः। तत्र पञ्चावयवं सर्वप्रथमम् आन्वीक्षिकी, तर्कविद्या, प्रमाणशास्त्रं, पदार्थशास्त्रस्य प्रणेता, महर्षि "गौतम" एव अङ्गीकृतवान्। अनेन गौतमेन अयमवयवपरम्परा सूत्ररूपेण निरूपिता। यथा- "प्रतिज्ञाहेतूदाहरणो-पनयनिगमनान्यवयवाः"[1] इति। एतेषामवयवानामपि पुनः प्रत्येकस्य अवयवस्य लक्षणमपि सूत्ररूपेण दर्शितवान्। यथा- "साध्यनिर्देशः प्रतिज्ञा"।[2] "उदाहरणसामर्थ्यात् साध्यसाधनं हेतुः"।[3] "तथा वैधर्म्यात्"।[4] "साध्यसाधर्म्यात्तद्धर्मभावीदृष्टान्तो-दाहरणम्"।[5] "उदाहरणापेक्षस्तथेत्युपसंहारो न तथेति वा साध्यस्योपनयः"।[6] "हेत्वपदेशात् प्रतिज्ञायाः पुनर्वचनं निगमनम्"[7] इति। पश्चाद्भाष्यकारेण वात्स्यायनेन स्वभाष्ये सुष्टु विशदीकृतवान्। एतेषाम् अवयवानां महद्वैशिष्ट्यं यदेते स्वोत्पत्तिकालमारभ्य इदानीन्तनकालावच्छेदेनापि स्वनाम्नि किमपि परिवर्तनं परिवर्धनं वा नापेक्षमानाः तथैव स्वरूपेणावतिष्ठन्ते। यद्यपि हेत्वाभासादि प्रकरणपरिष्कारेषु नव्यनैयायिकैः नामान्तराणि स्वीकृतानि। यथा- "सत्प्रतिपक्ष-असिद्ध-बाधित" इत्येतेषां "प्रकरणसम-साध्यसम-कालातीत" शब्देनोच्यन्ते। एवं सूत्रपठितानि "पूर्ववत्-शेषवत्-सामान्यतोदष्टानि" अनुमानानि "केवलान्वयि-केवलव्यतिरेकि-अन्वयव्यतिरेकि" नामान्तरैः प्रयुज्यन्ते। परन्तु "प्रतिज्ञाहेतूदाहरणोपनयनिगमनानां पञ्चावयवानां नाम्नि प्रयोगे तु वर्तमानकालावच्छेदेनापि किमपि परिवर्तनं दृष्टिगोचरं न भवति। यद्यपि नव्यनैयायिकैः प्राचीननैयायिकानां लक्षणानि परिवर्तितानि सन्ति। तथापि पञ्चावयवानां विषये तेषामनुसरणमेवकृतम् इत्यप्यस्ति अवयवानां विशेषः। अन्यच्च उद्योतकर-वाचस्पतिमिश्र-जयन्तभट्ट-उदयनाचार्यप्रभृति प्राचीननैयायिकैः प्रतिज्ञादिपदं न्यूनावयवेभ्यो, न्यूनावयवस्वीकतृणां समस्तास्ता अवयवपरम्पराः सविस्तरं निरस्ता इत्यपि विशेषं द्रष्टव्यमस्माभिः।

एवं वैशेषिकसूत्रेषु अवयवानामुल्लेखो न स्पष्टीकृतः। तथापि भाष्यकारेण श्री प्रशस्तपादेन पञ्चावयवानां प्रयोगः स्वीकृतः। किन्तु तेषामवयवानां नाम्नि भेदोवर्तते यथा- (१) प्रतिज्ञा (२) अपदेश (३) निदर्शन (४) अनुसन्धान (५) प्रत्याम्नायपदाभिधेयानि[1] इति। एतेषु वैशेषिकदर्शनाभिमतेषु पञ्चावयवेषु प्रथमोऽवयवः न्यायसूत्रानुसारी भवति। द्वितीयोऽवयवः वैशेषिक सूत्रे एव लभ्यते। परन्तु अन्तिमत्रयाणामप्यवयवानां विषये वैशेषिकसूत्रेषु किमपि न दृश्यते। अतः एतेषांत्रयाणामप्यवयवानां निर्वचनं स्वयं प्रशस्तपादेनैवकृतंस्यादिति प्रतीयते। एवंविध नामकरणं प्रशस्तपादेन किमर्थं कृतमिति चेत्, अयं हेतुर्भवितुमर्हति यत् न्यायसूत्रकारीयावयवेभ्यः स्वावयवानां किमपि

* (यू.जी.सी./जे.आर.एफ.), शोधछात्रा, न्यायवैशेषिकः, दर्शनविभागः, संस्कृतविद्याधर्मविज्ञान सङ्कायः, काशी हिन्दू विश्वविद्यालयः, वाराणसी

वैलक्षण्यं प्रदर्शनीयमिति। साङ्ख्याचार्य श्रीमाठरमहोदयेन पञ्चावयवानां निर्देशावसरे श्री प्रशस्तपादानामेव अनुसरणं कृतवन्तः। अत्रायं विशेषः यत् एभिः निरूपिताः त्रयोप्यवयवाः दृष्टिगोचरतां यान्ति। "पक्ष-हेतु-दृष्टान्तानां" नामनिर्वचनं कृत्वा "प्रतिज्ञाहेतूदाहरणा"न्यपि निर्दिष्टवन्तः श्रीमाठरमहोदयाः। पञ्चावयवप्रयोगस्तु सांख्यसूत्रेष्वपि मान्योस्ति ये च पञ्चावयवा गौतमानुसारं श्रीविज्ञानभिक्षुणा स्पष्टीकृताः। **दशावयवपरम्परा**– केचन प्राचीनग्रन्थेषु दशावयवव्यवस्थापि दृष्टिगोचरो भवति। तत्र न्यायभाष्ये एव केचन नैयायिकैकदेशिनः दशावयवान् अङ्गीकुर्वन्ति। अन्यत्र, दशवैकालिकनिर्युक्तिगाथायामपि दशावयवप्रयोगः दृश्यते। महर्षिणा वात्स्यायनेन स्वभाष्ये दशावयववादिनी व्यवस्था इत्थं प्रस्तूयते यथा– (१) प्रतिज्ञा (२) हेतुः (३) उदाहरणम् (४) उपनयः (५) निगमनम् (६) जिज्ञासा (७) संशयः (८) शक्यप्राप्तिः (९) प्रयोजनम् (१०) संशयव्युदासः इति। निर्युक्तिगाथानामके ग्रन्थे दशावयवव्यवस्था प्रकारद्वयमस्तीति श्रूयते, तथा च प्रथमः प्रकारः– (१) प्रतिज्ञा (२) प्रतिज्ञाविशुद्धिः (३) हेतुः (४) हेतुविशुद्धिः (५) दृष्टान्तः (६) दृष्टान्तविशुद्धिः (७) उपसंहारः (८) उपसंहारविशुद्धिः (९) निगमनम् (१०) निगमनविशुद्धिः। द्वितीयः प्रकारः– (१) प्रतिज्ञा (२) प्रतिज्ञाविभक्तिः (३) हेतुः (४) हेतुविभक्तिः (५) विपक्षः (६) प्रतिषेधः (७) दृष्टान्तः (८) आशङ्का (९) आशङ्काप्रतिषेधः (१०) निगमनम्।

अत्रायं विषयः स्मर्तव्यः यत् नैयायिकसार्वभौमेन श्रीवात्स्यायनेन प्रथमपञ्चावयवातिरिक्तास्तुरीय-पञ्चावयवाः परार्थानुमानप्रयोगे न अङ्गभूताभवन्तीति सम्यगुद्घोषितम्। अतः तार्किकदृष्ट्या एतेषां पञ्चावयववाक्यानां नास्ति किमपि मूल्यं, सर्वथा निरसनीयाश्च ते सन्ति। **चतुरवयववाद परम्परा**– अमुं चतुरवयवपरम्पराम् अनन्तवीर्यहेमचन्द्राभिधानकैः जैनाचार्यैः अङ्गीकृतमिति श्रूयते। **अवयवत्रयवादिनः**– अवयवत्रयस्वीकारपक्षे प्रधानतया सांख्यमीमांसक-अद्वैतवादिनामेव परिगणनं भवितुमर्हति। सांख्यग्रन्थेषु माठरवृत्तौ अवयवचर्चा भवति। तत्र-प्रतिज्ञा-हेतु-उदाहरणानाम् अवयवत्रयाणां निर्वचनं कृतम्। मीमांसादर्शने यद्यपि अवयवचर्चा नास्ति, तथापि कुमारिलभट्ट-पार्थसारथिमिश्र-मनोमेयोदयकारः श्री नारायणभट्ट-प्रभाकर-शालिकनाथप्रभृतिभिः मीमांसकैः त्रयएव अवयवा अङ्गीकृता इति सुनिश्चितमेतत्। **अवयवद्वय परम्परा**– आचार्यधर्मकीर्तिः, जैनतार्किकश्च एतौ द्वावेव अवयवद्वयवादिनौ स्तः। द्वयोरेतावानेव भेदः यत् प्रथमः "उदाहरणोपनयौ" स्वीकरोति। अपरश्च "प्रतिज्ञा हेतू" इति अङ्गीकरोति। **एकावयववादि परम्परा**– एकावयववादिपरम्परापि सर्वप्राथम्येण धर्मकीर्तिना एव स्वीकृतः। परन्तु एतस्य एकावयवव्यवस्था धर्मकीर्तिना विशिष्टाधिकारिणां विदुषामेव कृता इति। तथा च नैयायिकैः पञ्चावयवाः अङ्गीक्रियन्ते। तत्र प्रतिज्ञा नाम साध्यवत्तया पक्षवचनं प्रतिज्ञा। पञ्चम्यन्तं लिङ्गप्रतिपादकं वचनं-हेतुः। व्याप्तिप्रतिपादकं वचनमुदाहरणम्। व्याप्तिविशिष्टलिङ्गप्रतिपादकं वचनमुपनयः। हेतुसाध्यवत्तया पक्षप्रतिपादकं वचनं निगमनम्। पक्षज्ञानं प्रतिज्ञा प्रयोजनम्। लिङ्गज्ञानं हेतुप्रयोजनम्। व्याप्तिज्ञानं उदाहरणप्रयोजनम्। पक्षधर्मज्ञानम् उपनयप्रयोजनम्। अबाधितत्वाधिकं निगमनप्रयोजनम्।[१०] तथा च एते अवयवाः न्यायसाध्ये भवतः। अतः विशिष्टतया नैयायिकैः पञ्चावयवाः स्वीक्रियन्ते। न्यायोनाम "प्रमाणैरर्थपरीक्षणं न्यायः" इति न्यायभाष्ये स्पष्टीकृतमस्ति। तर्हि तत्र प्रमाणानि कति सन्ति इति पृष्टेसति, उच्यते– "तत्र यथार्थानुभवः प्रत्यक्षप्रमैवेति चार्वाकाः। अनुमितिरपीति कणादबौद्धाः। उपमितिरपीति नैयायिकैकदेशिनः। शब्दमपीति-नैयायिकाः। अर्थापत्तिरपीति- प्राभाकराः। अनुपलब्धिकोपीति-भाट्टवेदान्तिनौ। साम्भविकैतिह्यकावपि इति-पौराणिकाः। चैष्टिकापीति-तान्त्रिकाः। एतेषां सति अस्वरसं सम्भाव्य चातुर्विध्य"मङ्गीकुर्वन्ति नैयायिकाः। तत्र भासर्वज्ञादयः त्रीण्येवप्रमाणानि अङ्गीकुर्वन्ति। तानि 'प्रत्यक्षानुमानागमे'ति। उपमानादीनामत्रैवान्तर्भावं प्रतिपादयिष्यामः इति। तथा च नैयायिकैरङ्गीकृत चतुर्षुप्रमाणेषु अवयवानां विनियोगः एवं भवति। यथा– प्रतिज्ञा शब्दप्रमाणे, हेतुरनुमाने, उदाहरणं प्रत्यक्षे। उपनयः उपमाने। निगम्यन्ते अनेनार्थविशेषा इति निगमनम् इति शम्।

## सन्दर्भ ग्रंथ सूची–

**१.** न्यायदर्शनम्–न्या.सू. २/२/३२. **२.** न्यायदर्शनम्–न्या.सू. २/२/३३. **३.** न्यायदर्शनम्–न्या.सू. २/२/३४. **४.** न्यायदर्शनम्–न्या.सू. २/२/३५. **५.** न्यायदर्शनम्–न्या.सू. २/२/३६. **६.** न्यायदर्शनम्–न्या.सू. २/२/३८. **७.** न्यायदर्शनम्–न्या.सू. २/२/३९. ८. न्या.भू. पृ.सं. ८०. **९.** प्रशस्तपादभाष्यम्, पृ. सं. ५६५. १०. त.स.दी. पृ.सं. ९९.